# श्री बगलामुखी हृदय स्तोत्र

वन्देऽहं देवीं पीतभूषणभूषिताम् ।

तेजोरुपमयीं देवीं पीततेजः स्वरुपिणीम् ।। १ ।।

गदाभ्रमणभिन्नाभ्रां भ्रकुटीभीषणाननाम् ।

भीषयन्तीं भीमशत्रून् भजे भव्यस्य भक्तिदाम् ।। २ ।।

पूर्ण-चन्द्रसमानास्यां पीतगन्धानुलेपनाम् ।

पीताम्बरपरीधानां पवित्रामाश्रयाम्यहम् ।। ३ ।।

पालयन्तीमनुपलं प्रसमीक्ष्याऽवनीतले ।

पीताचाररतां भक्तां स्ताम्भवानीं भजाम्यहम् ।। ४ ।।

पीतपद्मपदद्वन्द्वां चम्पकारण्य रुपिणीम् ।

पीतावतंसां परमां वन्दे पद्मजवन्दिताम् ।। ५ ।।

लसञ्चारुसिञ्जत्सुमञ्जीरपादां चलत्स्वर्णकर्णावतंसाञ्चितास्याम् ।

वलत्पीतचन्द्राननां चन्द्रवन्द्यां भजे पद्मजादीड्यसत्पादपद्माम् ।। ६ ।।

सुपीताभयामालया पूतमन्त्रं परं ते जपन्तो जयं संलभन्ते ।

रणे रागरोषाप्लुतानां रिपूणां विवादे बलाद्वैरकृद्-घातमातः ।। ७ ।।

भरत्पीतभास्वत्प्रभाहस्कराभां गदागञ्जितामित्रगर्वां गरिष्ठाम् ।

गरीयोगुणागारगात्रां गुणाढ्यां गणेशादिगम्यां श्रये निर्गुणाड्याम् ।। ८ ।।

जना ये जपन्त्युग्रबीजं जगत्सु परं प्रत्यहं ते स्मरन्तः स्वरुपम् ।

भवेद् वादिनां वाङ्मुखस्तम्भ आद्ये जयो जायते जल्पतामाशु तेषाम् ।। ९ ।।

तव ध्याननिष्ठाप्रतिष्ठात्मप्रज्ञावतां पादपद्मार्चने प्रेमयुक्ताः ।

प्रसन्ना नृपाः प्राकृताः पण्डिता वा पुराणादिगा दासतुल्या भवन्ति ।। १० ।।

नमामस्ते मातः कनक-कमनीयाङ्घ्रीजलजम् ।

बलद्विद्युद्वर्णं घन-मितिर-विध्वंस-करणम् ।।

भवाब्धौ मग्नात्मोत्तरणकरणं सर्वशरणम् ।

प्रपन्नानां मातर्जगति बगले दुःखदमनम् ।। ११ ।।

ज्वलज्ज्योत्स्ना रत्नाकरमणिविभुषिक्तांक भवनम् ।

स्मरामस्ते धाम स्मरहरहरीन्द्रेन्द्रुप्रमुखैः ।।

अहोरात्रं प्रातः प्रणयनवनीयं सुविशदम् ।
परं पीताकारं परिचितमणिद्वीपवसनम् ।। १२ ।।

वदामस्ते मातः श्रुतिसुखकरं नाम ललितम् ।
लसन्मात्रावर्णं जगति बगलेति प्रचरितम् ।
चलन्तस्तिष्ठन्तो वयमुपविशन्तोऽपि शयने ।
भजामोयच्छ्रेयो दिवि दूरवलभ्यं दिविषदाम् ।। १३ ।।

पदार्चायां प्रीतिः प्रतिदिनमपूर्वा प्रभवतु ।
यथा ते प्रासन्न्यं प्रतिपलमपरक्ष्यं प्रणमताम् ।।

अनल्पं तन्मातर्भवति भृतभक्तया भवतु नो ।
दिशातः सद्-भक्तिं भुवि भगवतां भूरि भवदाम् ।। १४ ।।

मम सकलरिपूणां वाङ्मुखे स्तम्भयाशु ।
भगवति रिपुजिह्वां कीलय प्रस्थतुल्याम् ।।

व्यवसितखलबुद्धिं नाशयाऽऽशु प्रगल्भाम् ।
मम कुरु बहुकार्यं सत्कृपेऽम्ब प्रसीद ।। १५ ।।

व्रजतु मम रिपुणां सद्यनि प्रेतसंस्था ।

करधृतगदया तान् घातयित्वाऽऽशु रोषात् ।।

सधनवसनधान्यं सद्म तेषां प्रदह्य ।

पुनरपि बगला स्वस्थानमायातु शीघ्रम् ।। १६ ।।

करघृतुरिपुजिह्वा पीडनव्यग्रहस्तां ।

पुनरपि गदया तांस्ताडयन्तीं सुतन्त्राम् ।।

प्रणतसुरगणानां पालिकां पीतवस्त्रां ।

बहुबलबगलान्तां पीतवस्त्रां नमामः ।। १७ ।।

हृदयवचनकायः कुर्वतां भक्तिपुञ्जं ।

प्रकटति करुणार्द्रा प्रीणती जल्पतीति ।।

धनमथ बहुधान्यं पुत्रपौत्रादिवृद्धिः ।

सकलमपि किमेभ्यो देयमेवं त्ववश्यम् ।। १८ ।।

तव चरणसरोजं सर्वदा सेव्यमानं ।

द्रुहिणहरिहराद्यैर्देववृन्दैः शरण्यम् ।।

मृदुलमपि शरं ते शर्म्मदं सूरिसेव्यं ।

वयमिह करवामो मातरेतद् विधेयम् ।। १९ ।।

## ।। फल-श्रुति ।।

बगलाहृदयस्तोत्रमिदं भक्तिसमन्वितः ।

पठेद् यो बगला तस्य प्रसन्ना पाठतो भवेत् ।। २० ।।

पीता ध्यान परो भक्तो यः श्रृणोत्यविकल्पत ।

निष्कल्मषो भवेन् मर्त्यो मृतो मोक्षमवाप्नुयात् ।। २१ ।।

आश्विनस्य सिते पक्षे महाष्टम्यां दिवानिशम् ।

यस्त्विदं पठते प्रेम्णा बगलाप्रीतिमेति सः ।। २२ ।।

देव्यालये पठन् मर्त्यो बगलां ध्यायतीश्वरीम् ।

पीतवस्त्रावृतो यस्तु तस्य नश्यन्ति शत्रवः ।। २३ ।।

पीताचाररतो नित्यं पीतभूषां विचिन्तयन् ।

बगलां यः पठेन् नित्यं हृदयस्तोत्रमुत्तमम् ।। २४ ।।

न किञ्चिदद्दुर्लभं तस्यदृश्यते जगतीतले ।

शत्रवो ग्लानिर्मायान्ति तस्य दर्शनमात्रतः ।। २५ ।।

श्रीरुद्र-यामले उत्तर-खण्डे बगला-पटले श्रीबगलाहृदयम् ।।